# Shri Devi or Paravti SahasranAmastotram

# શ્રીદેવી અથવા પાર્વતિસહસ્રનામસ્તોત્રમ્ કૂર્મપુરાણાન્તર્ગતમ્

## Document Information

Text title : devI evaM pArvatI sahasranAmastotra kUrmapurANAntargatam

File name : shrIdevIsahasranAmastotraKurmaPurana.itx

Category : sahasranAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : sa.wikisource.org

Proofread by : DPD

Latest update : June 1, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીદેવી અથવા પાર્વતિસહસ્રનામસ્તોત્રમ્ કૂર્મપુરાણાન્તર્ગતમ્

અથ દેવીમાહાત્મ્યમ્ ।
સૂત ઉવાચ
ઇત્યાકર્ણ્યાથ મુનયઃ કૂર્મરૂપેણ ભાષિતમ્ ।
વિષ્ણુના પુનરેવૈનં પ્રણતા હરિમ્ ॥ ૧૨।૧॥

ઋષયઃ ઊચુઃ
કૈષા ભગવતી દેવી શંકરાર્દ્ધશરીરિણી ।
શિવા સતી હૈમવતી યથાવદ્બ્રૂહિ પૃચ્છતામ્ ॥ ૧૨।૨॥

તેષાં તદ્વચનં શ્રુત્વા મુનીનાં પુરુષોત્તમઃ ।
પ્રત્યુવાચ મહાયોગી ધ્યાત્વા સ્વં પરમં પદમ્ ॥ ૧૨।૩॥

શ્રીકૂર્મ ઉવાચ
પુરા પિતામહેનોક્તં મેરુપૃષ્ઠે સુશોભને ।
રહસ્યમેતદ્ વિજ્ઞાનં ગોપનીયં વિશેષતઃ ॥ ૧૨।૪॥

સાંખ્યાનાં પરમં સાંખ્યં બ્રહ્મવિજ્ઞાનમુત્તમમ્ ।
સંસારાર્ણવમગ્નાનાં જન્તૂનામેકમોચનમ્ ॥ ૧૨।૫॥

યા સા માહેશ્વરી શક્તિર્જ્ઞાનરૂપાઽતિલાલસા ।
વ્યોમસંજ્ઞા પરા કાષ્ઠા સેયં હૈમવતી મતા ॥ ૧૨।૬॥

શિવા સર્વગતાઽનાન્તા ગુણાતીતાતિનિષ્કલા ।
એકાનેકવિભાગસ્થા જ્ઞાનરૂપાઽતિલાલસા ॥ ૧૨।૭॥

અનન્યા નિષ્કલે તત્ત્વે સંસ્થિતા તસ્ય તેજસા ।
સ્વાભાવિકી ચ તન્મૂલા પ્રભા ભાનોરિવામલા ॥ ૧૨।૮॥

એકા માહેશ્વરી શક્તિરનેકોપાધિયોગતઃ ।
પરાવરેણ રૂપેણ ક્રીડતે તસ્ય સન્નિધૌ ॥ ૧૨।૯॥

સેયં કરોતિ સકલં તસ્યાઃ કાર્યમિદં જગત્ ।
ન કાર્યં નાપિ કરણમીશ્વરસ્યેતિ સૂરયઃ ॥ ૧૨।૧૦॥

ચતસ્રઃ શક્તયો દેવ્યાઃ સ્વરૂપત્વેન સંસ્થિતાઃ ।
અધિષ્ઠાનવશાત્તસ્યાઃ શ઼ૃણુધ્વં મુનિપુંગવાઃ ॥ ૧૨।૧૧॥

શાન્તિર્વિદ્યા પ્રતિષ્ઠા ચ નિવૃત્તિશ્ચેતિ તાઃ સ્મૃતાઃ ।
ચતુર્વ્યૂહસ્તતો દેવઃ પ્રોચ્યતે પરમેશ્વરઃ ॥ ૧૨।૧૨॥

અનયા પરયા દેવઃ સ્વાત્માનન્દં સમશ્નુતે ।
ચતુર્ષ્વપિ ચ વેદેષુ ચતુર્મૂર્તિર્મહેશ્વરઃ ॥ ૧૨।૧૩॥

અસ્યાસ્ત્વનાદિસંસિદ્ધમૈશ્વર્યમતુલં મહત્ ।
તત્સમ્બન્ધાદનન્તાયા રુદ્રેણ પરમાત્મના ॥ ૧૨।૧૪॥

સૈષા સર્વેશ્વરી દેવી સર્વભૂતપ્રવર્તિકા ।
પ્રોચ્યતે ભગવાન્ કાલો હરિઃ પ્રાણો મહેશ્વરઃ ॥ ૧૨।૧૫॥

તત્ર સર્વમિદં પ્રોતમોતંચૈવાખિલં જગત્ ।
સ કાલોઽગ્નિર્હરો રુદ્રો ગીયતે વેદવાદિભિઃ ॥ ૧૨।૧૬॥

કાલઃ સૃજતિ ભૂતાનિ કાલઃ સંહરતે પ્રજાઃ ।
સર્વે કાલસ્ય વશગા ન કાલઃ કસ્યચિદ્ વશે ॥ ૧૨।૧૭॥

પ્રધાનં પુરુષસ્તત્ત્વં મહાનાત્મા ત્વહંકૃતિઃ ।
કાલેનાન્યાનિ તત્ત્વાનિ સમાવિષ્ટાનિ યોગિના ॥ ૧૨।૧૮॥

તસ્ય સર્વજગન્મૂર્તિઃ શક્તિર્માયેતિ વિશ્રુતા ।
તદેયં ભ્રામયેદીશો માયાવી પુરુષોત્તમઃ ॥ ૧૨।૧૯॥

સૈષા માયાત્મિકા શક્તિઃ સર્વાકારા સનાતની ।
વૈશ્વરૂપં મહેશસ્ય સર્વદા સમ્પ્રકાશયેત્ ॥ ૧૨।૨૦॥

અન્યાશ્ચ શક્તયો મુખ્યાસ્તસ્ય દેવસ્ય નિર્મિતાઃ ।
જ્ઞાનશક્તિઃ ક્રિયાશક્તિઃ પ્રાણશક્તિરિતિ ત્રયમ્ ॥ ૧૨।૨૧॥

સર્વાસામેવ શક્તીનાં શક્તિમન્તો વિનિર્મિતાઃ ।
માયયૈવાથ વિપ્રેન્દ્રાઃ સા ચાનાદિરનશ્વરાઃ ॥ ૧૨।૨૨॥

સર્વશક્ત્યાત્મિકા માયા દુર્નિવારા દુરત્યયા ।
માયાવી સર્વશક્તીશઃ કાલઃ કાલકારઃ પ્રભુઃ ॥ ૧૨।૨૩॥

કરોતિ કાલઃ સકલં સંહરેત્ કાલ એવ હિ ।
કાલઃ સ્થાપયતે વિશ્વં કાલાધીનમિદં જગત્ ॥ ૧૨।૨૪॥

લબ્ધ્વા દેવાધિદેવસ્ય સન્નિધિં પરમેષ્ઠિનઃ ।
અનન્તસ્યાખિલેશસ્ય શંભોઃ કાલાત્મનઃ પ્રભોઃ ॥ ૧૨।૨૫॥

પ્રધાનં પુરુષો માયા માયા ચૈવં પ્રપદ્યતે ।
એકા સર્વગતાનન્તા કેવલા નિષ્કલા શિવા ॥ ૧૨।૨૬॥

એકા શક્તિઃ શિવૈકોઽપિ શક્તિમાનુચ્યતે શિવઃ ।
શક્તયઃ શક્તિમન્તોઽન્યે સર્વશક્તિસમુદ્ભવાઃ ॥ ૧૨।૨૭॥

શક્તિશક્તિમતોર્ભેદં વદન્તિ પરમાર્થતઃ ।
અભેદંચાનુપશ્યન્તિ યોગિનસ્તત્ત્વચિન્તકાઃ ॥ ૧૨।૨૮॥

શક્તયો ગિરજા દેવી શક્તિમાનથ શંકરઃ ।
વિશેષઃ કથ્યતે ચાયં પુરાણે બ્રહ્મવાદિભિઃ ॥ ૧૨।૨૯॥

ભોગ્યા વિશ્વેશ્વરી દેવી મહેશ્વરપતિવ્રતા ।
પ્રોચ્યતે ભગવાન્ ભોક્તા કપર્દી નીલલોહિતઃ ॥ ૧૨।૩૦॥

મન્તા વિશ્વેશ્વરો દેવઃ શંકરો મન્મથાન્તકઃ ।
પ્રોચ્યતે મતિરીશાની મન્તવ્યા ચ વિચારતઃ ॥ ૧૨।૩૧॥

ઇત્યેતદખિલં વિપ્રાઃ શક્તિશક્તિમદુદ્ભવમ્ ।
પ્રોચ્યતે સર્વવેદેષુ મુનિભિસ્તત્ત્વદર્શિભિઃ ॥ ૧૨।૩૨॥

એતત્પ્રદર્શિતં દિવ્યં દેવ્યા માહાત્મ્યમુત્તમમ્ ।
સર્વવેદાન્તવીદેષુ નિશ્ચિતં બ્રહ્મવાદિભિઃ ॥ ૧૨।૩૩॥

એકં સર્વગતં સૂક્ષ્મં કૂટસ્થમચલં ધ્રુવમ્ ।
યોગિનસ્તત્પ્રપશ્યન્તિ મહાદેવ્યાઃ પરં પદમ્ ॥ ૧૨।૩૪॥

આનન્દમક્ષરં બ્રહ્મ કેવલં નિષ્કલં પરમ્ ।
યોગિનસ્તત્પ્રપશ્યન્તિ મહાદેવ્યાઃ પરં પદમ્ ॥ ૧૨।૩૫॥

પરાત્પરતરં તત્ત્વં શાશ્વતં શિવમચ્યુતમ્ ।
અનન્તપ્રકૃતૌ લીનં દેવ્યાસ્તત્પરમં પદમ્ ॥ ૧૨।૩૬॥

શુભં નિરઞ્જનં શુદ્ધં નિર્ગુણં દ્વૈતવર્જિતમ્ ।

આત્મોપલબ્ધિવિષયં દેવ્યાસ્તતપરમં પદમ્ ॥ ૧૨।૩૭॥

સૈષા ધાત્રી વિધાત્રી ચ પરમાનન્દમિચ્છતામ્ ।
સંસારતાપાનખિલાન્નિહન્તીશ્વરસંશ્રયા ॥ ૧૨।૩૮॥

તસ્માદ્વિમુક્તિમન્વિચ્છન્ પાર્વતીં પરમેશ્વરીમ્ ।
આશ્રયેત્સર્વભૂતાનામાત્મભૂતાં શિવાત્મિકામ્ ॥ ૧૨।૩૯॥

લબ્ધ્વા ચ પુત્રીં શર્વાણીં તપસ્તપ્ત્વા સુદુશ્ચરન્ ।
સભાર્યઃ શરણં યાતઃ પાર્વતીં પરમેશ્વરીમ્ ॥ ૧૨।૪૦॥

તાં દૃષ્ટ્વા જાયમાનાં ચ સ્વેચ્છયૈવ વરાનનામ્ ।
મેના હિમવતઃ પત્ની પ્રાહેદં પર્વતેશ્વરમ્ ॥ ૧૨।૪૧॥

મેનોવાચ
પશ્ય બાલામિમાં રાજન્રાજીવસદૃશાનનામ્ ।
હિતાય સર્વભૂતાનાં જાતા ચ તપસાવયોઃ ॥ ૧૨।૪૨॥

સોઽપિ દૃષ્ટ્વા તતઃ દેવીં તરુણાદિત્યસન્નિભામ્ ।
કપર્દિનીં ચતુર્વક્રાં ત્રિનેત્રામતિલાલસામ્ ॥ ૧૨।૪૩॥

અષ્ટહસ્તાં વિશાલાક્ષીં ચન્દ્રાવયવભૂષણામ્ ।
નિર્ગુણાં સગુણાં સાક્ષાત્સદસદ્વ્યક્તિવર્જિતામ્ ॥ ૧૨।૪૪॥

પ્રણમ્ય શિરસા ભૂમૌ તેજસા ચાતિવિહ્વલઃ ।
ભીતઃ કૃતાઞ્જલિસ્તસ્યાઃ પ્રોવાચ પરમેશ્વરીમ્ ॥ ૧૨।૪૫॥

હિમવાનુવાચ
કા ત્વં દેવિ વિશાલાક્ષિ શશાઙ્કાવયવાઙ્કિતે ।
ન જાને ત્વામહં વત્સે યથાવદ્બ્રૂહિ પૃચ્છતે ॥ ૧૨।૪૬॥

ગિરીન્દ્રવચનં શ્રુત્વા તતઃ સા પરમેશ્વરી ।
વ્યાજહાર મહાશૈલં યોગિનામભયપ્રદા ॥ ૧૨।૪૭॥

દેવ્યુવાચ
માં વિદ્ધિ પરમાં શક્તિં પરમેશ્વરસમાશ્રયામ્ ॥ ૧૨।૪૮॥

અનન્યામવ્યયામેકાં યાં પશ્યન્તિ મુમુક્ષવઃ ।
અહં વૈ સર્વભાવાનાત્મા સર્વાન્તરા શિવા ॥ ૧૨।૪૯॥

શાશ્વતૈશ્વર્યવિજ્ઞાનમૂર્તિઃ સર્વપ્રવર્તિકા ।

અનન્તાઽનન્તમહિમા સંસારાર્ણવતારિણી ॥ ૧૨।૫૦॥

દિવ્યં દદામિ તે ચક્ષુઃ પશ્ય મે રૂપમૈશ્વરમ્ ।
એતાવદુક્ત્વા વિજ્ઞાનં દત્ત્વા હિમવતે સ્વયમ્ ॥ ૧૨।૫૧॥

સ્વં રૂપં દર્શયામાસ દિવ્યં તત્ પારમેશ્વરમ્ ।
કોટિસૂર્યપ્રતીકાશં તેજોબિમ્બં નિરાકુલમ્ ॥ ૧૨।૫૨॥

જ્વાલામાલાસહસ્રાઢ્યં કાલાનલશતોપમમ્ ।
દંષ્ટ્રાકરાલં દુર્દ્ધર્ષં જટામણ્ડલમણ્ડિતમ્ ॥ ૧૨।૫૩॥

કિરીટિનં ગદાહસ્તં શઙ્ખચક્રધરં તથા ।
ત્રિશૂલવરહસ્તં ચ ઘોરરૂપં ભયાનકમ્ ॥ ૧૨।૫૪॥

પ્રશાન્તં સોમ્યવદનમનન્તાશ્ચર્યસંયુતમ્ ।
ચન્દ્રાવયવલક્ષ્માણં ચન્દ્રકોટિસમપ્રભમ્ ॥ ૧૨।૫૫॥

કિરીટિનં ગદાહસ્તં નૂપુરૈરુપશોભિતમ્ ।
દિવ્યમાલ્યામ્બરધરં દિવ્યગન્ધાનુલેપનમ્ ॥ ૧૨।૫૬॥

શઙ્ખચક્રધરં કામ્યં ત્રિનેત્રં કૃત્તિવાસસમ્ ।
અણ્ડસ્થં ચાણ્ડબાહ્યસ્થં બાહ્યમાભ્યન્તરં પરમ્ ॥ ૧૨।૫૭॥

સર્વશક્તિમયં શુભ્રં સર્વાકારં સનાતનમ્ ।
બ્રહ્મોન્દ્રોપેન્દ્રયોગીન્દ્રૈર્વન્દ્યમાનપદામ્બુજમ્ ॥ ૧૨।૫૮॥

સર્વતઃ પાણિપાદાન્તં સર્વતોઽક્ષિશિરોમુખમ્ ।
સર્વમાવૃત્ય તિષ્ઠન્તં દદર્શ પરમેશ્વરમ્ ॥ ૧૨।૫૯॥

દૃષ્ટ્વા તદીદૃશં રૂપં દેવ્યા માહેશ્વરં પરમ્ ।
ભયેન ચ સમાવિષ્ટઃ સ રાજા હૃષ્ટમાનસઃ ॥ ૧૨।૬૦॥

આત્મન્યાધાય ચાત્માનમોઙ્કારં સમનુસ્મરન્ ।
નામ્નામષ્ટસહસ્રેણ તુષ્ટાવ પરમેશ્વરીમ્ ॥ ૧૨।૬૧॥

હિમવાનુવાચ
શિવોમા પરમા શક્તિરનન્તા નિષ્કલામલા ।
શાન્તા માહેશ્વરી નિત્યા શાશ્વતી પરમાક્ષરા ॥ ૧૨।૬૨॥

અચિન્ત્યા કેવલાઽનન્ત્યા શિવાત્મા પરમાત્મિકા ।
અનાદિરવ્યયા શુદ્ધા દેવાત્મા સર્વગાઽચલા ॥ ૧૨।૬૩॥

એકાનેકવિભાગસ્થા માયાતીતા સુનિર્મલા ।
મહામાહેશ્વરી સત્યા મહાદેવી નિરઞ્જના ॥ ૧૨।૬૪॥

કાષ્ઠા સર્વાન્તરસ્થા ચ ચિચ્છક્તિરતિલાલસા ।
નન્દા સર્વાત્મિકા વિદ્યા જ્યોતીરૂપાઽમૃતાક્ષરા ॥ ૧૨।૬૫॥

શાન્તિઃ પ્રતિષ્ઠા સર્વેષાં નિવૃત્તિરમૃતપ્રદા ।
વ્યોમમૂર્તિર્વ્યોમલયા વ્યોમાધારાઽચ્યુતાઽમરા ॥ ૧૨।૬૬॥

અનાદિનિધનાઽમોઘા કારણાત્માકુલાકુલા ।
સ્વતઃ પ્રથમજાનાભિરમૃતસ્યાત્મસંશ્રયા ॥ ૧૨।૬૭॥

પ્રાણેશ્વરપ્રિયા માતા મહામહિષઘાતિની ।
પ્રાણેશ્વરી પ્રાણરૂપા પ્રધાનપુરુષેશ્વરી ॥ ૧૨।૬૮॥

મહામાયા સુદુષ્પૂરા મૂલપ્રકૃતિરીશ્વરી
સર્વશક્તિકલાકારા જ્યોત્સ્ના દ્યૌર્મહિમાસ્પદા ॥ ૧૨।૬૯॥

સર્વકાર્યનિયન્ત્રી ચ સર્વભૂતેશ્વરેશ્વરી ।
સંસારયોનિઃ સકલા સર્વશક્તિસમુદ્ભવા ॥ ૧૨।૭૦॥

સંસારપોતા દુર્વારા દુર્નિરીક્ષ્ય દુરાસદા ।
પ્રાણશક્તિઃ પ્રાણવિદ્યા યોગનીપરમા કલા ॥ ૧૨।૭૧॥

મહવિભૂતિદુર્દર્ષા મૂલપ્રકૃતિસમ્ભવા ।
અનાદ્યનન્તવિભવા પરમાદ્યાપકર્ષિણી ॥ ૧૨।૭૨॥

સર્ગસ્થિત્યન્તકરણી સુદુર્વાચ્યાદુરત્યયા ।
શબ્દયોનિઃ શબ્દમયી નાદાખ્યા નાદવિગ્રહા ॥ ૧૨।૭૩॥

અનાદિરવ્યક્તગુણા મહાનન્દા સનાતની ।
આકાશયોનિર્યોગસ્થા મહાયોગેશ્વરેશ્વરી ॥ ૧૨।૭૪॥

મહામાયા સુદુષ્પારા મૂલપ્રકૃતિરીશ્વરી
પ્રધાનપુરુષાતીતા પ્રધાનપુરુષાત્મિકા ॥ ૧૨।૭૫॥

પુરાણી ચિન્મયી પુંસામાદિઃ પુરુષરૂપિણી ।
ભૂતાન્તરાત્મા કૂટસ્થા મહાપુરુષસંજ્ઞિતા ॥ ૧૨।૭૬॥

જન્મમૃત્યુજરાતીતા સર્વશક્તિસમન્વિતા ।

વ્યાપિની ચાનવચ્છિન્ના પ્રધાનાનુપ્રવેશિની ॥ ૧૨।૭૭॥

ક્ષેત્રજ્ઞશક્તિરવ્યક્તલક્ષણા મલવર્જિતા ।
અનાદિમાયાસંભિન્ના ત્રિતત્ત્વા પ્રકૃતિગ્રહા ॥ ૧૨।૭૮॥

મહામાયાસમુત્પન્ના તામસી પૌરુષી ધ્રુવા ।
વ્યક્તાવ્યક્તાત્મિકા કૃષ્ણા રક્તા શુક્લા પ્રસૂતિકા ॥ ૧૨।૭૯॥

અકાર્યા કાર્યજનની નિત્યં પ્રસવધર્મિણી ।
સર્ગપ્રલયનિર્મુક્તા સૃષ્ટિસ્થિત્યન્તધર્મિણી ॥ ૧૨।૮૦॥

બ્રહ્મગર્ભા ચતુર્વિંશા પદ્મનાભાઽચ્યુતાત્મિકા ।
વૈદ્યુતી શાશ્વતી યોનિર્જગન્માતેશ્વરપ્રિયા ॥ ૧૨।૮૧॥

સર્વાધારા મહારૂપા સર્વૈશ્વર્યસમન્વિતા ।
વિશ્વરૂપા મહાગર્ભા વિશ્વેશેચ્છાનુવર્તિની ॥ ૧૨।૮૨॥

મહીયસી બ્રહ્મયોનિઃ મહાલક્ષ્મીસમુદ્ભવા
મહાવિમાનમધ્યસ્થા મહાનિદ્રાત્મહેતુકા ॥ ૧૨।૮૩॥

સર્વસાધારણી સૂક્ષ્મા હ્યવિદ્યા પારમાર્થિકા ।
અનન્તરૂપાઽનન્તસ્થા દેવી પુરુષમોહિની ॥ ૧૨।૮૪॥

અનેકાકારસંસ્થાના કાલત્રયવિવર્જિતા ।
બ્રહ્મજન્મા હરેર્મૂર્તિર્બ્રહ્મવિષ્ણુશિવાત્મિકા ॥ ૧૨।૮૫॥

બ્રહ્મેશવિષ્ણુજનની બ્રહ્માખ્યા બ્રહ્મસંશ્રયા ।
વ્યક્તા પ્રથમજા બ્રાહ્મી મહતી જ્ઞાનરૂપિણી ॥ ૧૨।૮૬॥

વૈરાગ્યૈશ્વર્યધર્માત્મા બ્રહ્મમૂર્તિર્હૃદિસ્થિતા ।
અપાંયોનિઃ સ્વયંભૂતિર્માનસી તત્ત્વસંભવા ॥ ૧૨।૮૭॥

ઈશ્વરાણી ચ શર્વાણી શંકરાર્દ્ધશરીરિણી ।
ભવાની ચૈવ રુદ્રાણી મહાલક્ષ્મીરથામ્બિકા ॥ ૧૨।૮૮॥

મહેશ્વરસમુત્પન્ના ભુક્તિમુક્તિફલપ્રદા ।
સર્વેશ્વરી સર્વવન્દ્યા નિત્યં મુદિતમાનસા ॥ ૧૨।૮૯॥

બ્રહ્મેન્દ્રોપેન્દ્રનમિતા શંકરેચ્છાનુવર્તિની ।
ઈશ્વરાર્દ્ધાસનગતા મહેશ્વરપતિવ્રતા ॥ ૧૨।૯૦॥

સકૃદ્વિભાતા સર્વાર્તિ સમુદ્રપરિશોષિણી ।
પાર્વતી હિમવત્પુત્રી પરમાનન્દદાયિની ॥ ૧૨।૯૧॥

ગુણાઢ્યા યોગજા યોગ્યા જ્ઞાનમૂર્તિર્વિકાસિની ।
સાવિત્રીકમલા લક્ષ્મીઃ શ્રીરનન્તોરસિ સ્થિતા ॥ ૧૨।૯૨॥

સરોજનિલયા મુદ્રા યોગનિદ્રા સુરાર્દિની ।
સરસ્વતી સર્વવિદ્યા જગજ્જ્યેષ્ઠા સુમઙ્ગલા ॥ ૧૨।૯૩॥

વાગ્દેવી વરદા વાચ્યા કીર્તિઃ સર્વાર્થસાધિકા ।
યોગીશ્વરી બ્રહ્મવિદ્યા મહાવિદ્યા સુશોભના ॥ ૧૨।૯૪॥

ગુહ્યવિદ્યાત્મવિદ્યા ચ ધર્મવિદ્યાત્મભાવિતા ।
સ્વાહા વિશ્વંભરા સિદ્ધિઃ સ્વધા મેધા ધૃતિઃ શ્રુતિઃ ॥ ૧૨।૯૫॥

નીતિઃ સુનીતિઃ સુકૃતિર્માધવી નરવાહિની ।
પૂજ્યા વિભાવરી સૌમ્યા ભોગિની ભોગશાયિની ॥ ૧૨।૯૬॥

શોભા વંશકરી લોલા માલિની પરમેષ્ઠિની ।
ત્રૈલોક્યસુન્દરી રમ્યા સુન્દરી કામચારિણી ॥ ૧૨।૯૭॥

મહાનુભાવા સત્ત્વસ્થા મહામહિષમર્દિની ।
પદ્મમાલા પાપહરા વિચિત્રા મુકુટાનના ॥ ૧૨।૯૮॥

કાન્તા ચિત્રામ્બરધરા દિવ્યાભરણભૂષિતા ।
હંસાખ્યા વ્યોમનિલયા જગત્સૃષ્ટિવિવર્દ્ધિની ॥ ૧૨।૯૯॥

નિર્યન્ત્રા યન્ત્રવાહસ્થા નન્દિની ભદ્રકાલિકા ।
આદિત્યવર્ણા કૌમારી મયૂરવરવાહના ॥ ૧૨।૧૦૦॥

વૃષાસનગતા ગૌરી મહાકાલી સુરાર્ચિતા ।
અદિતિર્નિયતા રૌદ્રા પદ્મગર્ભા વિવાહના ॥ ૧૨।૧૦૧॥

વિરૂપાક્ષી લેલિહાના મહાપુરનિવાસિની ।
મહાફલાऽનવદ્યાઙ્ગી કામરુપા વિભાવરી ॥ ૧૨।૧૦૨॥

વિચિત્રરત્નમુકુટા પ્રણતાર્તિપ્રભઞ્જની ।
કૌશિકી કર્ષણી રાત્રિસ્ત્રિદશાર્તિવિનાશિની ॥ ૧૨।૧૦૩॥

બહુરૂપા સ્વરૂપા ચ વિરૂપા રૂપવર્જિતા ।
ભક્તાર્તિશમની ભવ્યા ભવભારવિનાશની ॥ ૧૨।૧૦૪॥

નિર્ગુણા નિત્યવિભવા નિઃસારા નિરપત્રપા ।
યશસ્વિની સામગીતિર્ભવાઙ્ગનિલયાલયા ॥ ૧૨।૧૦૫॥

દીક્ષા વિદ્યાધરી દીપ્તા મહેન્દ્રવિનિપાતિની ।
સર્વાતિશાયિની વિશ્વા સર્વસિદ્ધિપ્રદાયિની ॥ ૧૨।૧૦૬॥

સર્વેશ્વરપ્રિયા ભાર્યા સમુદ્રાન્તરવાસિની ।
અકલઙ્કા નિરાધારા નિત્યસિદ્ધા નિરામયા ॥ ૧૨।૧૦૭॥

કામધેનુર્બૃહદ્ગર્ભા ધીમતી મોહનાશિની ।
નિઃસઙ્કલ્પા નિરાતઙ્કા વિનયા વિનયપ્રિયા ॥ ૧૨।૧૦૮॥

જ્વાલામાલાસહસ્રાઢ્યા દેવદેવી મનોમયી ।
મહાભગવતી ભર્ગા વાસુદેવસમુદ્ભવા ॥ ૧૨।૧૦૯॥

મહેન્દ્રોપેન્દ્રભગિની ભક્તિગમ્યા પરાવરા ।
જ્ઞાનજ્ઞેયા જરાતીતા વેદાન્તવિષયા ગતિઃ ॥ ૧૨।૧૧૦॥

દક્ષિણા દહના માયા સર્વભૂતનમસ્કૃતા ।
યોગમાયા વિભાગજ્ઞા મહામોહા મહીયસી ॥ ૧૨।૧૧૧॥

સંધ્યા સર્વસમુદ્ભૂતિર્બ્રહ્મવૃક્ષાશ્રયાનતિઃ ।
બીજાઙ્કુરસમુદ્ભૂતિર્મહાશક્તિર્મહામતિઃ ॥ ૧૨।૧૧૨॥

ખ્યાતિઃ પ્રજ્ઞા ચિતિઃ સંચ્ચિન્મહાભોગીન્દ્રશાયિની ।
વિકૃતિઃ શાંસરી શાસ્તિર્ગણગન્ધર્વસેવિતા ॥ ૧૨।૧૧૩॥

વૈશ્વાનરી મહાશાલા દેવસેના ગુહપ્રિયા ।
મહારાત્રિઃ શિવામન્દા શચી દુઃસ્વપ્નનાશિની ॥ ૧૨।૧૧૪॥

ઇજ્યા પૂજ્યા જગદ્ધાત્રી દુર્વિજ્ઞેયા સુરૂપિણી ।
તપસ્વિની સમાધિસ્થા ત્રિનેત્રા દિવિ સંસ્થિતા ॥ ૧૨।૧૧૫॥

ગુહામ્બિકા ગુણોત્પત્તિર્મહાપીઠા મરુત્સુતા ।
હવ્યવાહાન્તરાગાદિઃ હવ્યવાહસમુદ્ભવા ॥ ૧૨।૧૧૬॥

જગદ્યોનિર્જગન્માતા જન્મમૃત્યુજરાતિગા ।
બુદ્ધિમાતા બુદ્ધિમતી પુરુષાન્તરવાસિની ॥ ૧૨।૧૧૭॥

તરસ્વિની સમાધિસ્થા ત્રિનેત્રા દિવિસંસ્થિતા ।

સર્વેન્દ્રિયમનોમાતા સર્વભૂતહૃદિ સ્થિતા ॥ ૧૨।૧૧૮॥

સંસારતારિણી વિદ્યા બ્રહ્મવાદિમનોલયા ।
બ્રહ્માણી બૃહતી બ્રાહ્મી બ્રહ્મભૂતા ભવારણી ॥ ૧૨।૧૧૯॥

હિરણ્મયી મહારાત્રિઃ સંસારપરિવર્ત્તિકા ।
સુમાલિની સુરૂપા ચ ભાવિની તારિણી પ્રભા ॥ ૧૨।૧૨૦॥

ઉન્મીલની સર્વસહા સર્વપ્રત્યયસાક્ષિણી ।
સુસૌમ્યા ચન્દ્રવદના તાણ્ડવાસક્તમાનસા ॥ ૧૨।૧૨૧॥

સત્ત્વશુદ્ધિકરી શુદ્ધિર્મલત્રયવિનાશિની ।
જગત્પ્રિયા જગન્મૂર્તિસ્ત્રિમૂર્તિરમૃતાશ્ ॥ ૧૨।૧૨૨॥

નિરાશ્રયા નિરાહારા નિરઙ્કુરવનોદ્ભવા ।
ચન્દ્રહસ્તા વિચિત્રાઙ્ગી સ્રગ્વિણી પદ્મધારિણી ॥ ૧૨।૧૨૩॥

પરાવરવિધાનજ્ઞા મહાપુરુષપૂર્વજા ।
વિદ્યેશ્વરપ્રિયા વિદ્યા વિદ્યુજ્જિહ્વા જિતશ્રમા ॥ ૧૨।૧૨૪॥

વિદ્યામયી સહસ્રાક્ષી સહસ્રવદનાત્મજા ।
સહસ્રરશ્મિઃ સત્ત્વસ્થા મહેશ્વરપદાશ્રયા ॥ ૧૨।૧૨૫॥

ક્ષાલિની સન્મયી વ્યાપ્તા તૈજસી પદ્મબોધિકા ।
મહામાયાશ્રયા માન્યા મહાદેવમનોરમા ॥ ૧૨।૧૨૬॥

વ્યોમલક્ષ્મીઃ સિંહરથા ચેકિતાનામિતપ્રભા ।
વીરેશ્વરી વિમાનસ્થા વિશોકાશોકનાશિની ॥ ૧૨।૧૨૭॥

અનાહતા કુણ્ડલિની નલિની પદ્મવાસિની ।
સદાનન્દા સદાકીર્તિઃ સર્વભૂતાશ્રયસ્થિતા ॥ ૧૨।૧૨૮॥

વાગ્દેવતા બ્રહ્મકલા કલાતીતા કલારણી ।
બ્રહ્મશ્રીર્બ્રહ્મહૃદયા બ્રહ્મવિષ્ણુશિવપ્રિયા ॥ ૧૨।૧૨૯॥

વ્યોમશક્તિઃ ક્રિયાશક્તિર્જ્ઞાનશક્તિઃ પરાગતિઃ ।
ક્ષોભિકા બન્ધિકા ભેદ્યા ભેદાભેદવિવર્જિતા ॥ ૧૨।૧૩૦॥

અભિન્નાભિન્નસંસ્થાના વંશિની વંશહારિણી ।
ગુહ્યશક્તિર્ગુણાતીતા સર્વદા સર્વતોમુખી ॥ ૧૨।૧૩૧॥

ભગિની ભગવત્પત્ની સકલા કાલકારિણી ।
સર્વવિત્ સર્વતોભદ્રા ગુહ્યાતીતા ગુહાવલિઃ ॥ ૧૨।૧૩૨॥

પ્રક્રિયા યોગમાતા ચ ગઙ્ગા વિશ્વેશ્વરેશ્વરી ।
કપિલા કાપિલા કાન્તાકનકાભાકલાન્તરા ॥ ૧૨।૧૩૩॥

પુણ્યા પુષ્કરિણી ભોક્ત્રી પુરંદરપુરસ્સરા ।
પોષણી પરમૈશ્વર્યભૂતિદા ભૂતિભૂષણા ॥ ૧૨।૧૩૪॥

પઞ્ચબ્રહ્મસમુત્પત્તિઃ પરમાર્થાર્થવિગ્રહા ।
ધર્મોદયા ભાનુમતી યોગિજ્ઞેય મનોજવા ॥ ૧૨।૧૩૫॥

મનોહરા મનોરસ્થા તાપસી વેદરૂપિણી ।
વેદશક્તિર્વેદમાતા વેદવિદ્યાપ્રકાશિની ॥ ૧૨।૧૩૬॥

યોગેશ્વરેશ્વરી માતા મહાશક્તિર્મનોમયી ।
વિશ્વાવસ્થા વિયન્મૂર્ત્તિર્વિદ્યુન્માલા વિહાયસી ॥ ૧૨।૧૩૭॥

કિંનરી સુરભિર્વન્દ્યા નન્દિની નન્દિવલ્લભા ।
ભારતી પરમાનન્દા પરાપરવિભેદિકા ॥ ૧૨।૧૩૮॥

સર્વપ્રહરણોપેતા કામ્યા કામેશ્વરેશ્વરી ।
અચિન્ત્યાઽચિન્ત્યવિભવા હૃલ્લેખા કનકપ્રભા ૧૨।૧૩૯॥

કૂષ્માણ્ડી ધનરત્નાઢ્યા સુગન્ધા ગન્ધાયિની ।
ત્રિવિક્રમપદોદ્ભૂતા ધનુષ્પાણિઃ શિવોદયા ॥ ૧૨।૧૪૦॥

સુદુર્લભા ધનાધ્યક્ષા ધન્યા પિઙ્ગલલોચના ।
શાન્તિઃ પ્રભાવતી દીપ્તિઃ પઙ્કજાયતલોચના ॥ ૧૨।૧૪૧॥

આદ્યા હૃત્કમલોદ્ભૂતા ગવાં મતા રણપ્રિયા ।
સત્ક્રિયા ગિરિજા શુદ્ધિર્નિત્યપુષ્ટા નિરન્તરા ॥ ૧૨।૧૪૨॥

દુર્ગાકાત્યાયનીચણ્ડી ચર્ચિકા શાન્તવિગ્રહા ।
હિરણ્યવર્ણા રજની જગદ્યન્ત્રપ્રવર્તિકા ॥ ૧૨।૧૪૩॥

મન્દરાદ્રિનિવાસા ચ શારદા સ્વર્ણમાલિની ।
રત્નમાલા રત્નગર્ભા પૃથ્વી વિશ્વપ્રમાથિની ॥ ૧૨।૧૪૪॥

પદ્માનના પદ્મનિભા નિત્યતુષ્ટાઽમૃતોદ્ભવા ।
ધુન્વતી દુઃપ્રકમ્પા ચ સૂર્યમાતા દૃષદ્વતી ॥ ૧૨।૧૪૫॥

મહેન્દ્રભગિની માન્યા વરેણ્યા વરદયિકા ।
કલ્યાણી કમલાવાસા પઞ્ચચૂડા વરપ્રદા ॥ ૧૨।૧૪૬॥

વાચ્યા વરેશ્વરી વન્દ્યા દુર્જયા દુરતિક્રમા ।
કાલરાત્રિર્મહાવેગા વીરભદ્રપ્રિયા હિતા ॥ ૧૨।૧૪૭॥

ભદ્રકાલી જગન્માતા ભક્તાનાં ભદ્રદાયિની ।
કરાલા પિઙ્ગલાકારા કામભેદાઽમહામદા ॥ ૧૨।૧૪૮॥

યશસ્વિની યશોદા ચ ષડધ્વપરિવર્ત્તિકા ।
શઙ્ખિની પદ્મિની સાંખ્યા સાંખ્યયોગપ્રવર્તિકા ॥ ૧૨।૧૪૯॥

ચૈત્રા સંવત્સરારૂઢા જગત્સમ્પૂરણીધ્વજા ।
શુમ્ભારિઃ ખેચરીસ્વસ્થા કમ્બુગ્રીવાકલિપ્રિયા ॥ ૧૨।૧૫૦॥

ખગધ્વજા ખગારૂઢા પરાર્યા પરમાલિની ।
ઐશ્વર્યપદ્મનિલયા વિરક્તા ગરુડાસના ॥ ૧૨।૧૫૧॥

જયન્તી હૃદ્ગુહા ગમ્યા ગહ્વરેષ્ઠા ગણાગ્રણીઃ ।
સંકલ્પસિદ્ધા સામ્યસ્થા સર્વવિજ્ઞાનદાયિની ॥ ૧૨।૧૫૨॥

કલિકલ્પવિહન્ત્રી ચ ગુહ્યોપનિષદુત્તમા ।
નિષ્ઠા દૃષ્ટિઃ સ્મૃતિર્વ્યાપ્તિઃ પુષ્ટિસ્તુષ્ટિઃ ક્રિયાવતી ॥ ૧૨।૧૫૩॥

વિશ્વામરેશ્વરેશાના ભુક્તિર્મુક્તિઃ શિવાઽમૃતા ।
લોહિતા સર્પમાલા ચ ભીષણી વનમાલિની ॥ ૧૨।૧૫૪॥

અનન્તશયનાઽનન્તા નરનારાયણોદ્ભવા ।
નૃસિંહી દૈત્યમથની શઙ્ખચક્રગદાધરા ॥ ૧૨।૧૫૫॥

સંકર્ષણસમુત્પત્તિરમ્બિકાપાદસંશ્રયા ।
મહાજ્વાલા મહામૂર્ત્તિઃ સુમૂર્ત્તિઃ સર્વકામધુક્ ॥ ૧૨।૧૫૬॥

સુપ્રભા સુસ્તના સૌરી ધર્મકામાર્થમોક્ષદા ।
ભ્રૂમધ્યનિલયા પૂર્વા પુરાણપુરુષારણિઃ ॥ ૧૨।૧૫૭॥

મહાવિભૂતિદા મધ્યા સરોજનયના સમા ।
અષ્ટાદશભુજાનાદ્યા નીલોત્પલદલપ્રભ૧૨।૧૫૮॥

સર્વશક્ત્યાસનારૂઢા સર્વધર્માર્થવર્જિતા ।

વૈરાગ્યજ્ઞાનનિરતા નિરાલોકા નિરિન્દ્રિયા ॥ ૧૨।૧૫૯॥

વિચિત્રગહનાધારા શાશ્વતસ્થાનવાસિની ।
સ્થાનેશ્વરી નિરાનન્દા ત્રિશૂલવરધારિણી ॥ ૧૨।૧૬૦॥

અશેષદેવતામૂર્ત્તિર્દેવતા વરદેવતા ।
ગણામ્બિકા ગિરેઃ પુત્રી નિશુમ્ભવિનિપાતિની ॥ ૧૨।૧૬૧॥

અવર્ણા વર્ણરહિતા ત્રિવર્ણા જીવસંભવા ।
અનન્તવર્ણાઽનન્યસ્થા શંકરી શાન્તમાનસા ॥ ૧૨।૧૬૨॥

અગોત્રા ગોમતી ગોપ્ત્રી ગુહ્યરૂપા ગુણોત્તરા ।
ગૌર્ગીર્ગવ્યપ્રિયા ગૌણી ગણેશ્વરનમસ્કૃતા ॥ ૧૨।૧૬૩॥

સત્યમાતા સત્યસંધા ત્રિસંધ્યા સંધિવર્જિતા ।
સર્વવાદાશ્રયા સાંખ્યા સાંખ્યયોગસમુદ્ભવા ॥ ૧૨।૧૬૪॥

અસંખ્યેયાઽપ્રમેયાખ્યા શૂન્યા શુદ્ધકુલોદ્ભવા ।
બિન્દુનાદસમુત્પત્તિઃ શંભુવામા શશિપ્રભા ॥ ૧૨।૧૬૫॥

પિષઙ્ગા ભેદરહિતા મનોજ્ઞા મધુસૂદની ।
મહાશ્રીઃ શ્રીસમુત્પત્તિસ્તમઃપારે પ્રતિષ્ઠિતા ॥ ૧૨।૧૬૬॥

ત્રિતત્ત્વમાતા ત્રિવિધા સુસૂક્ષ્મપદસંશ્રયા ।
શન્તા ભીતા મલાતીતા નિર્વિકારા નિરાશ્રયા ॥ ૧૨।૧૬૭॥

શિવાખ્યા ચિત્તનિલયા શિવજ્ઞાનસ્વરૂપિણી ।
દૈત્યદાનવનિર્માત્રી કાશ્યપી કાલકર્ણિકા ॥ ૧૨।૧૬૮॥

શાસ્ત્રયોનિઃ ક્રિયામૂર્તિશ્ચતુર્વર્ગપ્રદર્શિકા ।
નારાયણી નરોદ્ભૂતિઃ કૌમુદી લિઙ્ગધારિણી ॥ ૧૨।૧૬૯॥

કામુકી લલિતાભાવા પરાપરવિભૂતિદા ।
પરાન્તજાતમહિમા બડવા વામલોચના ॥ ૧૨।૧૭૦॥

સુભદ્રા દેવકી સીતા વેદવેદાઙ્ગપારગા ।
મનસ્વિની મન્યુમાતા મહામન્યુસમુદ્ભવા ॥ ૧૨।૧૭૧॥

અમૃત્યુરમૃતાસ્વાદા પુરુહૂતા પુરુષ્ટુતા ।
અશોચ્યા ભિન્નવિષયા હિરણ્યરજતપ્રિયા ॥ ૧૨।૧૭૨॥

હિરણ્યા રાજતી હૈમા હેમાભરણભૂષિતા ।
વિભ્રાજમાના દુર્જ્ઞેયા જ્યોતિષ્ટોમફલપ્રદા ॥ ૧૨।૧૭૩॥

મહાનિદ્રાસમુદ્ભૂતિરનિદ્રા સત્યદેવતા ।
દીર્ઘાકકુમ્મિની હૃદ્યા શાન્તિદા શાન્તિવર્દ્ધિની ॥ ૧૨।૧૭૪॥

લક્ષ્મ્યાદિશક્તિજનની શક્તિચક્રપ્રવર્તિકા ।
ત્રિશક્તિજનની જન્યા ષડૂર્મિપરિવર્જિતા ॥ ૧૨।૧૭૫॥

સુધામા કર્મકરણી યુગાન્તદહનાત્મિકા ।
સંકર્ષણી જગદ્ધાત્રી કામયોનિઃ કિરીટિની ॥ ૧૨।૧૭૬॥

ઐન્દ્રી ત્રૈલોક્યનમિતા વૈષ્ણવી પરમેશ્વરી ।
પ્રદ્યુમ્નદયિતા દાત્રી યુગ્મદૃષ્ટિસ્ત્રિલોચના ॥ ૧૨।૧૭૭॥

મદોત્કટા હંસગતિઃ પ્રચણ્ડા ચણ્ડવિક્રમા ।
વૃષાવેશા વિયન્માતા વિન્ધ્યપર્વતવાસિની ॥ ૧૨।૧૭૮॥

હિમવન્મેરુનિલયા કૈલાસગિરિવાસિની ।
ચાણૂરહન્તૃતનયા નીતિજ્ઞા કામરૂપિણી ॥ ૧૨।૧૭૯॥

વેદવિદ્યાવ્રતસ્નાતા ધર્મશીલાઽનિલાશના ।
વીરભદ્રપ્રિયા વીરા મહાકામસમુદ્ભવા ॥ ૧૨।૧૮૦॥

વિદ્યાધરપ્રિયા સિદ્ધા વિદ્યાધરનિરાકૃતિઃ ।
આપ્યાયની હરન્તી ચ પાવની પોષણી કલા ॥ ૧૨।૧૮૧॥

માતૃકા મન્મથોદ્ભૂતા વારિજા વાહનપ્રિયા ।
કરીષિણી સુધાવાણી વીણાવાદનતત્પરા ॥ ૧૨।૧૮૨॥

સેવિતા સેવિકા સેવ્યા સિનીવાલી ગરુત્મતી ।
અરુન્ધતી હિરણ્યાક્ષી મૃગાંકા માનદાયિની ॥ ૧૨।૧૮૩॥

વસુપ્રદા વસુમતી વસોર્દ્ધારા વસુંધરા ।
ધારાધરા વરારોહા વરાવરસહસ્રદા ॥ ૧૨।૧૮૪॥

શ્રીફલા શ્રીમતી શ્રીશા શ્રીનિવાસા શિવપ્રિયા ।
શ્રીધરા શ્રીકરી કલ્યા શ્રીધરાર્દ્ધશરીરિણી ॥ ૧૨।૧૮૫॥

અનન્તદૃષ્ટિરક્ષુદ્રા ધાત્રીશા ધનદપ્રિયા ।
નિહન્ત્રી દૈત્યસઙ્ઘાનાં સિંહિકા સિંહવાહના ॥ ૧૨।૧૮૬॥

સુષેણા ચન્દ્રનિલયા સુકીર્તિશ્છિન્નસંશયા ।
રસજ્ઞા રસદા રામા લેલિહાનામૃતસ્રવા ॥ ૧૨।૧૮૭॥

નિત્યોદિતા સ્વયંજ્યોતિરુત્સુકા મૃતજીવના ।
વજ્રદણ્ડા વજ્રજિહ્વા વૈદેહી વજ્રવિગ્રહા ॥ ૧૨।૧૮૮॥

મઙ્ગલ્યા મઙ્ગલા માલા મલિના મલહારિણી ।
ગાન્ધર્વી ગારુડી ચાન્દ્રી કમ્બલાશ્વતરપ્રિયા ॥ ૧૨।૧૮૯॥

સૌદામિની જનાનન્દા ભ્રુકુટીકુટિલાનના ।
કર્ણિકારકરા કક્ષ્યા કંસપ્રાણાપહારિણી ॥ ૧૨।૧૯૦॥

યુગંધરા યુગાવર્ત્તા ત્રિસંધ્યા હર્ષવર્દ્ધની ।
પ્રત્યક્ષદેવતા દિવ્યા દિવ્યગન્ધા દિવા પરા ॥ ૧૨।૧૯૧॥

શક્રાસનગતા શાક્રી સાન્ધ્યા ચારુશરાસના ।
ઇષ્ટા વિશિષ્ટા શિષ્ટેષ્ટા શિષ્ટાશિષ્ટપ્રપૂજિતા ॥ ૧૨।૧૯૨॥

શતરૂપા શતાવર્ત્તા વિનતા સુરભિઃ સુરા ।
સુરેન્દ્રમાતા સુદ્યુમ્ના સુષુમ્ના સૂર્યસંસ્થિતા ॥ ૧૨।૧૯૩॥

સમીક્ષ્યા સત્પ્રતિષ્ઠા ચ નિવૃત્તિર્જ્ઞાનપારગા ।
ધર્મશાસ્ત્રાર્થકુશલા ધર્મજ્ઞા ધર્મવાહના ॥ ૧૨।૧૯૪॥

ધર્માધર્મવિનિર્માત્રી ધાર્મિકાણાં શિવપ્રદા ।
ધર્મશક્તિર્ધર્મમયી વિધર્મા વિશ્વધર્મિણી ॥ ૧૨।૧૯૫॥

ધર્માન્તરા ધર્મમયી ધર્મપૂર્વા ધનાવહા ।
ધર્મોપદેષ્ટ્રી ધર્મત્મા ધર્મગમ્યા ધરાધરા ॥ ૧૨।૧૯૬॥

કાપાલી શકલા મૂર્ત્તિઃ કલા કલિતવિગ્રહા ।
સર્વશક્તિવિનિર્મુક્તા સર્વશક્ત્યાશ્રયાશ્રયા ॥ ૧૨।૧૯૭॥

સર્વા સર્વેશ્વરી સૂક્ષ્મા સૂક્ષ્માજ્ઞાનસ્વરૂપિણી ।
પ્રધાનપુરુષેશેષા મહાદેવૈકસાક્ષિણી ॥ ૧૨।૧૯૮॥

સદાશિવા વિયન્મૂર્ત્તિર્વિશ્વમૂર્ત્તિરમૂર્ત્તિકા ।
એવં નામ્નાં સહસ્રેણ સ્તુત્વાઽસૌ હિમવાન્ ગિરિઃ ॥ ૧૨।૧૯૯॥

ભૂયઃ પ્રણમ્ય ભીતાત્મા પ્રોવાચેદં કૃતાઞ્જલિઃ ।

યદેતદૈશ્વરં રૂપં ઘોરં તે પરમેશ્વરિ ॥ ૧૨।૨૦૦॥

ભીતોઽસ્મિ સામ્પ્રતં દૃષ્ટ્વા રૂપમન્યત્ પ્રદર્શય ।
એવમુક્તાઽથ સા દેવી તેન શૈલેન પાર્વતી ॥ ૧૨।૨૦૧॥

સંહૃત્ય દર્શયામાસ સ્વરૂપમપરં પુનઃ ।
નીલોત્પલદલપ્રખ્યં નીલોત્પલસુગન્ધિકમ્ ॥ ૧૨।૨૦૨॥

દ્વિનેત્રં દ્વિભુજં સૌમ્યં નીલાલકવિભૂષિતમ્ ।
રક્તપાદામ્બુજતલં સુરક્તકરપલ્લવમ્ ॥ ૧૨।૨૦૩॥

શ્રીમદ્વિશાલસંવૃત્તંલલાટતિલકોજ્જ્વલમ્ ।
ભૂષિતં ચારુસર્વાઙ્ગં ભૂષણૈરતિકોમલમ્ ॥ ૧૨।૨૦૪॥

દધાનમુરસા માલાં વિશાલાં હેમનિર્મિતામ્ ।
ઈષત્સ્મિતં સુબિમ્બોષ્ઠં નૂપુરારાવસંયુતમ્ ॥ ૧૨।૨૦૫॥

પ્રસન્નવદનં દિવ્યમનન્તમહિમાસ્પદમ્ ।
તદીદૃશં સમાલોક્ય સ્વરૂપં શૈલસત્તમઃ ॥ ૧૨।૨૦૬॥

ભીતિં સંત્યજ્ય હૃષ્ટાત્મા બભાષે પરમેશ્વરીમ્ ।
હિમવાનુવાચ
અદ્ય મે સફલં જન્મ અદ્ય મે સફલં તપઃ ॥ ૧૨।૨૦૭॥

યન્મે સાક્ષાત્ત્વમવ્યક્તા પ્રસન્ના દૃષ્ટિગોચરા ।
ત્વયા સૃષ્ટં જગત્ સર્વં પ્રધાનાદ્યં ત્વયિ સ્થિતમ્ ॥ ૧૨।૨૦૮॥

ત્વય્યેવ લીયતે દેવિ ત્વમેવ ચ પરા ગતિઃ ।
વદન્તિ કેચિત્ ત્વામેવ પ્રકૃતિં પ્રકૃતેઃ પરામ્ ॥ ૧૨।૨૦૯॥

અપરે પરમાર્થજ્ઞાઃ શિવેતિ શિવસંશ્રયાત્ ।
ત્વયિ પ્રધાનં પુરુષો મહાન્ બ્રહ્મા તથેશ્વરઃ ॥ ૧૨।૨૧૦॥

અવિદ્યા નિયતિર્માયા કલાદ્યાઃ શતશોઽભવન્ ।
ત્વં હિ સા પરમા શક્તિરનન્તા પરમેષ્ઠિની ॥ ૧૨।૨૧૧॥

સર્વભેદવિનિર્મુક્તા સર્વભેદાશ્રયાશ્રયા ।
ત્વામધિષ્ઠાય યોગેશિ મહાદેવો મહેશ્વરઃ ॥ ૧૨।૨૧૨॥

પ્રધાનાદ્યં જગત્ કૃત્સ્નં કરોતિ વિકરોતિ ચ ।
ત્વયૈવ સંગતો દેવઃ સ્વમાનન્દં સમશ્નુતે ॥ ૧૨।૨૧૩॥

ત્વમેવ પરમાનન્દસ્ત્વમેવાનન્દદાયિની ।
ત્વમક્ષરં પરં વ્યોમ મહજ્જ્યોતિર્નિરઞ્જનમ્ ॥ ૧૨।૨૧૪॥

શિવં સર્વગતં સૂક્ષ્મં પરં બ્રહ્મ સનાતનમ્ ।
ત્વં શક્રઃ સર્વદેવાનાં બ્રહ્મા બ્રહ્મવિદામસિ ॥ ૧૨।૨૧૫॥

વાયુર્બલવતાં દેવિ યોગિનાં ત્વં કુમારકઃ ।
ઋષીણાં ચ વસિષ્ઠસ્ત્વં વ્યાસો વેદવિદામસિ ॥ ૧૨।૨૧૬॥

સાંખ્યાનાં કપિલો દેવો રુદ્રાણામસિ શંકરઃ ।
આદિત્યાનામુપેન્દ્રસ્ત્વં વસૂનાં ચૈવ પાવકઃ ॥ ૧૨।૨૧૭॥

વેદાનાં સામવેદસ્ત્વં ગાયત્રી છન્દસામસિ ।
અધ્યાત્મવિદ્યા વિદ્યાનાં ગતીનાં પરમા ગતિઃ ॥ ૧૨।૨૧૮॥

માયા ત્વં સર્વશક્તીનાં કાલઃ કલયતામસિ ।
ઓઙ્કારઃ સર્વગુહ્યાનાં વર્ણાનાં ચ દ્વિજાત્તમઃ ॥ ૧૨।૨૧૯॥

આશ્રમાણાં ચ ગાર્હસ્થ્યમીશ્વરાણાં મહેશ્વરઃ ।
પુંસાં ત્વમેકઃ પુરુષઃ સર્વભૂતહૃદિ સ્થિતઃ ॥ ૧૨।૨૨૦॥

સર્વોપનિષદાં દેવિ ગુહ્યોપનિષદુચ્યતે ।
ઈશાનશ્ચાસિ કલ્પાનાં યુગાનાં કૃતમેવ ચ ॥ ૧૨।૨૨૧॥

આદિત્યઃ સર્વમાર્ગાણાં વાચાં દેવિ સરસ્વતી ।
ત્વં લક્ષ્મીશ્ચારુરૂપાણાં વિષ્ણુર્માયાવિનામસિ ॥ ૧૨।૨૨૨॥

અરુન્ધતી સતીનાં ત્વં સુપર્ણઃ પતતામસિ ।
સૂક્તાનાં પૌરુષં સૂક્તં સામ જ્યેષ્ટં ચ સામસુ ॥ ૧૨।૨૨૩॥

સાવિત્રી ચાસિ જાપ્યાનાં યજુષાં શતરુદ્રિયમ્ ।
પર્વતાનાં મહામેરુરનન્તો ભોગિનામસિ ॥ ૧૨।૨૨૪॥

સર્વેષાં ત્વં પરં બ્રહ્મ ત્વન્મયં સર્વમેવ હિ ॥ ૧૨।૨૨૫॥

રૂપં તવાશેષકલાવિહીન-
મગોચરં નિર્મલમેકરૂપમ્ ।
અનાદિમધ્યાન્તમનન્તમાદ્યં
નમામિ સત્યં તમસઃ પરસ્તાત્ ॥ ૧૨।૨૨૬॥

યદેવ પશ્યન્તિ જગત્પ્રસૂતિં
વેદાન્તવિજ્ઞાનવિનિશ્ચિતાર્થાઃ ।
આનન્દમાત્રં પ્રણવાભિધાનં
તદેવ રૂપં શરણં પ્રપદ્યે ॥ ૧૨।૨૨૭॥

અશેષભૂતાન્તરસન્નિવિષ્ટં
પ્રધાનપુંયોગવિયોગહેતુમ્ ।
તેજોમયં જન્મવિનાશહીનં
પ્રાણાભિધાનં પ્રણતોઽસ્મિ રૂપમ્ ॥ ૧૨।૨૨૮॥

આદ્યન્તહીનં જગદાત્મભૂતં
વિભિન્નસંસ્થં પ્રકૃતેઃ પરસ્તાત્ ।
કૂટસ્થમવ્યક્તવપુસ્તથૈવ
નમામિ રૂપં પુરુષાભિધાનમ્ ॥ ૧૨।૨૨૯॥

સર્વાશ્રયં સર્વજગદ્વિધાનં
સર્વત્રગં જન્મવિનાશહીનમ્ ।
સૂક્ષ્મં વિચિત્રં ત્રિગુણં પ્રધાનં
નતોઽસ્મિ તે રૂપમરૂપભેદમ્ ॥ ૧૨।૨૩૦॥

આદ્યં મહાન્તં પુરુષાત્મરૂપં
પ્રકૃત્યવસ્થં ત્રિગુણાત્મબીજમ્ ।
ઐશ્વર્યવિજ્ઞાનવિરાગધર્મૈઃ
સમન્વિતં દેવિ નતોઽસ્મિ રૂપમ્ ॥ ૧૨।૨૩૧॥

દ્વિસપ્તલોકાત્મકમમ્બુસંસ્થં
વિચિત્રભેદં પુરુષૈકનાથમ્ ।
અનન્તભૂતૈરધિવાસિતં તે
નતોઽસ્મિ રૂપં જગદણ્ડસંજ્ઞમ્ ॥ ૧૨।૨૩૧॥

અશેષવેદાત્મકમેકમાદ્યં
સ્વતેજસા પૂરિતલોકભેદમ્ ।
ત્રિકાલહેતું પરમેષ્ઠિસંજ્ઞં
નમામિ રૂપં રવિમણ્ડલસ્થમ્ ॥ ૧૨।૨૩૨॥

સહસ્રમૂર્ધાનમનન્તશક્તિં
સહસ્રબાહું પુરુષં પુરાણમ્ ।

શયાનમન્તઃ સલિલે તથૈવ
નારાયણાખ્યં પ્રણતોઽસ્મિ રૂપમ્ ॥ ૧૨।૨૩૩॥

દંષ્ટ્રાકરાલં ત્રિદશાભિવન્દ્યં
યુગાન્તકાલાનલકલ્પરૂપમ્ ।
અશેષભૂતાણ્ડવિનાશહેતું
નમામિ રૂપં તવ કાલસંજ્ઞમ્ ॥ ૧૨।૨૩૪॥

ફણાસહસ્રેણ વિરાજમાનં
ભોગીન્દ્રમુખ્યૈરભિપૂજ્યમાનમ્ ।
જનાર્દનારૂઢતનું પ્રસુપ્તં
નતોઽસ્મિ રૂપં તવ શેષસંજ્ઞમ્ ॥ ૧૨।૨૩૫॥

અવ્યાહતૈશ્વર્યમયુગ્મનેત્રં
બ્રહ્મામૃતાનન્દરસજ્ઞમેકમ્ ।
યુગાન્તશેષં દિવિ નૃત્યમાનં
નતોઽસ્મિ રૂપં તવ રુદ્રસંજ્ઞમ્ ॥ ૧૨।૨૩૬॥

પ્રહીણશોકં વિમલં પવિત્રં
સુરાસુરૈરર્ચિતાપાદપદ્મમ્ ।
સુકોમલં દેવિ વિભાસિ શુભ્રં
નમામિ તે રૂપમિદં ભવાનિ ॥ ૧૨।૨૩૭॥

ૐ નમસ્તેઽસ્તુ મહાદેવિ નમસ્તે પરમેશ્વરિ ।
નમો ભગવતીશાનિ શિવાયૈ તે નમો નમઃ ॥ ૧૨।૨૩૮॥

ત્વન્મયોઽહં ત્વદાધારસ્ત્વમેવ ચ ગતિર્મમ ।
ત્વામેવ શરણં યાસ્યે પ્રસીદ પરમેશ્વરિ ॥ ૧૨।૨૩૯॥

મયા નાસ્તિ સમો લોકે દેવો વા દાનવોઽપિ વા ।
જગન્માતૈવ મત્પુત્રી સંભૂતા તપસા યતઃ ॥ ૧૨।૨૪૦॥

એષા તવામ્બિકા દેવિ કિલાભૂત્પિતૃકન્યકા ।
મેનાઽશેષજગન્માતુરહો પુણ્યસ્ય ગૌરવમ્ ॥ ૧૨।૨૪૧॥

પાહિ મામમરેશાનિ મેનયા સહ સર્વદા ।
નમામિ તવ પાદાબ્જં વ્રજામિ શરણં શિવામ્ ॥ ૧૨।૨૪૨॥

અહો મે સુમહદ્ ભાગ્યં મહાદેવીસમાગમાત્ ।

આજ્ઞાપય મહાદેવિ કિં કરિષ્યામિ શંકરિ ॥ ૧૨।૨૪૩॥

એતાવદુક્ત્વા વચનં તદા હિમગિરીશ્વરઃ ।
સમ્પ્રેક્ષણમાણો ગિરિજાં પ્રાગ્જલિઃ પાર્શ્વતોઽભવત્ ॥ ૧૨।૨૪૪॥

અથ સા તસ્ય વચનં નિશમ્ય જગતોઽરણિઃ ।
સસ્મિતં પ્રાહ પિતરં સ્મૃત્વા પશુપતિં પતિમ્ ॥ ૧૨।૨૪૬॥

દેવ્યુવાચ
શ‍ૃણુષ્વ ચૈતત્ પ્રથમં ગુહ્યમીશ્વરગોચરમ્ ।
ઉપદેશં ગિરિશ્રેષ્ઠ સેવિતં બ્રહ્મવાદિભિઃ ॥ ૧૨।૨૪૭॥

યન્મે સાક્ષાત્ પરં રૂપમૈશ્વરં દૃષ્ટમદ્ભુતમ્ ।
સર્વશક્તિસમાયુક્તમનન્તં પ્રેરકં પરમ્ ॥ ૧૨।૨૪૮॥

શાન્તઃ સમાહિતમના દમ્ભાહંકારવર્જિતઃ ।
તન્નિષ્ઠસ્તત્પરો ભૂત્વા તદેવ શરણં વ્રજ ॥ ૧૨।૨૪૯॥

ભક્ત્યા ત્વનન્યયા તાત પદ્ભાવં પરમાશ્રિતઃ ।
સર્વયજ્ઞતપોદાનૈસ્તદેવાર્ચ્ચય સર્વદા ॥ ૧૨।૨૫૦॥

તદેવ મનસા પશ્ય તદ્ ધ્યાયસ્વ યજસ્વ ચ ।
મમોપદેશાત્સંસારં નાશયામિ તવાનઘ ॥ ૧૨।૨૫૧॥

અહં વૈ મત્પરાન્ ભક્તાનૈશ્વરં યોગમાસ્થિતાન્ ।
સંસારસાગરાદસ્માદુદ્ધરામ્યચિરેણ તુ ॥ ૧૨।૨૫૨॥

ધ્યાનેન કર્મયોગેન ભક્ત્યા જ્ઞાનેન ચૈવ હિ ।
પ્રાપ્યાઽહં તે ગિરિશ્રેષ્ઠ નાન્યથા કર્મકોટિભિઃ ॥ ૧૨।૨૫૩॥

શ્રુતિસ્મૃત્યુદિતં સમ્યક્ કર્મ વર્ણાશ્રમાત્મકમ્ ।
અધ્યાત્મજ્ઞાનસહિતં મુક્તયે સતતં કુરુ ॥ ૧૨।૨૫૪॥

ધર્માત્સંજાયતે ભક્તિર્ભક્ત્યા સમ્પ્રાપ્યતે પરમ્ ।
શ્રુતિસ્મૃતિભ્યામુદિતો ધર્મો યજ્ઞાદિકો મતઃ ॥ ૧૨।૨૫૫॥

નાન્યતો જાયતે ધર્મો વેદાદ્ ધર્મો હિ નિર્બભૌ ।
તસ્માન્મુમુક્ષુર્ધર્માર્થી મદ્રૂપં વેદમાશ્રયેત્ ॥ ૧૨।૨૫૬॥

મમૈવૈષા પરા શક્તિર્વેદસંજ્ઞા પુરાતની ।
ઋગ્યજુઃ સામરૂપેણ સર્ગાદૌ સમ્પ્રવર્ત્તતે ॥ ૧૨।૨૫૭॥

તેષામેવ ચ ગુપ્ત્યર્થં વેદાનાં ભગવાનજઃ ।
બ્રાહ્મણાદીન્ સસર્જાથ સ્વે સ્વે કર્મણ્યયોજયત્ ॥ ૧૨।૨૫૮॥

યે ન કુર્વન્તિ તદ્ ધર્મં તદર્થં બ્રહ્મનિર્મિતાઃ ।
તેષામધસ્તાદ્ નરકાંસ્તામિસ્રાદીનકલ્પયત્ ॥ ૧૨।૨૫૯॥

ન ચ વેદાદૃતે કિઞ્ચિચ્છાસ્ત્રં ધર્માભિધાયકમ્ ।
યોઽન્યત્રરમતેસોઽસૌ ન સંભાષ્યો દ્વિજાતિભિઃ ॥ ૧૨।૨૬૦॥

યાનિ શાસ્ત્રાણિ દૃશ્યન્તે લોકેઽસ્મિન્ વિવિધાનિતુ ।
શ્રુતિસ્મૃતિવિરુદ્ધાનિ નિષ્ઠા તેષાં હિ તામસી ॥ ૧૨।૨૬૧॥

કાપાલં પઞ્ચરાત્રં ચ યામલં વામમાર્હતમ્ ।
એવંવિધાનિ ચાન્યાનિ મોહનાર્થાનિ તાનિ તુ ॥ ૧૨।૨૬૨॥

યે કુશાસ્ત્રાભિયોગેન મોહયન્તીહ માનવાન્ ।
મયા સૃષ્ટાનિ શાસ્ત્રાણિ મોહાયૈષાં ભવાન્તરે ॥ ૧૨।૨૬૩॥

વેદાર્થવિત્તમૈઃ કાર્યં યત્ સ્મૃતં કર્મ વૈદિકમ્ ।
તત્પ્રયત્નેન કુર્વન્તિ મત્પ્રિયાસ્તે હિ યે નરાઃ ॥ ૧૨।૨૬૪॥

વર્ણાનામનુકમ્પાર્થં મન્નિયોગાદ્વિરાટ્ સ્વયમ્ ।
સ્વાયંભુવો મનુર્ધાર્માન્ મુનીનાં પૂર્વમુક્તવાન્ ॥ ૧૨।૨૬૫॥

શ્રુત્વા ચાન્યેઽપિ મુનયસ્તન્મુખાદ્ ધર્મમુત્તમમ્ ।
ચક્રુર્ધર્મપ્રતિષ્ઠાર્થં ધર્મશાસ્ત્રાણિ ચૈવ હિ ॥ ૧૨।૨૬૬॥

તેષુ ચાન્તર્હિતેષ્વેવં યુગાન્તેષુ મહર્ષયઃ ।
બ્રહ્મણો વચનાત્તાનિ કરિષ્યન્તિ યુગે યુગે ॥ ૧૨।૨૬૭॥

અષ્ટાદશ પુરાણાનિ વ્યાસેન કથિતાનિ તુ ।
નિયોગાદ્ બ્રહ્મણો રાજંસ્તેષુ ધર્મઃ પ્રતિષ્ઠિતઃ ॥ ૧૨।૨૬૮॥

અન્યાન્યુપપુરાણાનિ તચ્છિષ્યૈઃ કથિતાનિ તુ ।
યુગે યુગેઽત્ર સર્વેષાં કર્તા વૈ ધર્મશાસ્ત્રવિત્ ॥ ૧૨।૨૬૯॥

શિક્ષા કલ્પો વ્યાકરણં નિરુક્તં છન્દ એવ ચ ।
જ્યોતિઃ શાસ્ત્રં ન્યાયવિદ્યા મીમાંસા ચોપબૃંહણમ્ ॥ ૧૨।૨૭૦॥

એવં ચતુર્દશૈતાનિ વિદ્યાસ્થાનાનિ સત્તમ ।

ચતુર્વેદૈઃ સહોક્તાનિ ધર્મો નાન્યત્ર વિદ્યતે ॥ ૧૨।૨૭૧॥

એવં પૈતામહં ધર્મં મનુવ્યાસાદયઃ પરમ્ ।
સ્થાપયન્તિ મમાદેશાદ્ યાવદાભૂતસમ્પ્લવમ્ ॥ ૧૨।૨૭૨॥

બ્રહ્મણા સહ તે સર્વે સમ્પ્રાપ્તે પ્રતિસંચરે ।
પરસ્યાન્તે કૃતાત્માનઃ પ્રવિશન્તિ પરં પદમ્ ॥ ૧૨।૨૭૩॥

તસ્માત્ સર્વપ્રયત્નેન ધર્માર્થં વેદમાશ્રયેત્ ।
ધર્મેણ સહિતં જ્ઞાનં પરં બ્રહ્મ પ્રકાશયેત્ ॥ ૧૨।૨૭૪॥

યે તુ સઙ્ગાન્ પરિત્યજ્ય મામેવ શરણં ગતાઃ ।
ઉપાસતે સદા ભક્ત્યા યોગમૈશ્વરમાસ્થિતાઃ ॥ ૧૨।૨૭૫॥

સર્વભૂતદયાવન્તઃ શાન્તા દાન્તા વિમત્સરાઃ ।
અમાનિનો બુદ્ધિમન્તસ્તાપસાઃ શંસિતવ્રતાઃ ॥ ૧૨।૨૭૬॥

મચ્ચિત્તા મદ્ગતપ્રાણા મજ્જ્ઞાનકથને રતાઃ ।
સંન્યાસિનો ગૃહસ્થાશ્ચ વનસ્થા બ્રહ્મચારિણઃ ॥ ૧૨।૨૭૭॥

તેષાં નિત્યાભિયુક્તાનાં માયાતત્ત્વં સમુત્થિતમ્ ।
નાશયામિ તમઃ કૃત્સ્નં જ્ઞાનદીપેન મા ચિરાત્ ॥ ૧૨।૨૭૮॥

તે સુનિર્ધૂતતમસો જ્ઞાનેનૈકેન મન્મયાઃ ।
સદાનન્દાસ્તુ સંસારે ન જાયન્તે પુનઃ પુનઃ ॥ ૧૨।૨૭૯॥

તસ્માત્ સર્વપ્રકારેણ મદ્ભક્તો મત્પરાયણઃ ।
મામેવાર્ચય સર્વત્ર મનસા શરણં ગતઃ ॥ ૧૨।૨૮૦॥

અશક્તો યદિ મે ધ્યાતુમૈશ્વરં રૂપમવ્યયમ્ ।
તતો મે સકલં રૂપં કાલાદ્યં શરણં વ્રજ ॥ ૧૨।૨૮૧॥

યદ્યત્ સ્વરૂપં મે તાત મનસો ગોચરં તવ ।
તન્નિષ્ઠસ્તત્પરો ભૂત્વા તદર્ચનપરો ભવ ॥ ૧૨।૨૮૨॥

યત્તુ મે નિષ્કલં રૂપં ચિન્માત્રં કેવલં શિવમ્ ।
સર્વોપાધિવિનિર્મુક્તમનન્તમમૃતં પરમ્ ॥ ૧૨।૨૮૩॥

જ્ઞાનેનૈકેન તલ્લભ્યં ક્લેશેન પરમં પદમ્ ।
જ્ઞાનમેવ પ્રપશ્યન્તો મામેવ પ્રવિશન્તિ તે ॥ ૧૨।૨૮૪॥

તદ્બુદ્ધયસ્તદાત્માનસ્તન્નિષ્ઠાસ્તત્પરાયણાઃ ।
ગચ્છન્ત્યપુનરાવૃત્તિં જ્ઞાનનિર્ધૂતકલ્મષાઃ ॥ ૧૨।૨૮૫॥

મામનાશ્રિત્ય પરમં નિર્વાણમમલં પદમ્ ।
પ્રાપ્યતે ન હિ રાજેન્દ્ર તતો માં શરણં વ્રજ ॥ ૧૨।૨૮૬॥

એકત્વેન પૃથક્ત્વેન તથા ચોભયથાપિ વા ।
મામુપાસ્ય મહારાજ તતો યાસ્યાસિ તત્પદમ્ ॥ ૧૨।૨૮૭॥

મામનાશ્રિત્ય તત્તત્ત્વં સ્વભાવવિમલં શિવમ્ ।
જ્ઞાયતે ન હિ રાજેન્દ્ર તતો માં શરણં વ્રજ ॥ ૧૨।૨૮૮॥

તસ્માત્ ત્વમક્ષરં રૂપં નિત્યં ચારૂપમૈશ્વરમ્ ।
આરાધય પ્રયત્નેન તતો બન્ધં પ્રહાસ્યસિ ॥ ૧૨।૨૮૯॥

કર્મણા મનસા વાચા શિવં સર્વત્ર સર્વદા ।
સમારાધય ભાવેન તતો યાસ્યસિ તત્પદમ્ ॥ ૧૨।૨૯૦॥

ન વૈ પશ્યન્તિ તત્તત્ત્વં મોહિતા મમ માયયા ।
અનાદ્યનન્તં પરમં મહેશ્વરમજં શિવમ્ ॥ ૧૨।૨૯૧॥

સર્વભૂતાત્મભૂતસ્થં સર્વાધારં નિરઞ્જનમ્ ।
નિત્યાનન્દં નિરાભાસં નિર્ગુણં તમસઃ પરમ્ ॥ ૧૨।૨૯૨॥

અદ્વૈતમચલં બ્રહ્મ નિષ્કલં નિષ્પ્રપઞ્ચકમ્ ।
સ્વસંવેદ્યમવેદ્યં તત્ પરે વ્યોમ્નિ વ્યવસ્થિતમ્ ॥ ૧૨।૨૯૩॥

સૂક્ષ્મેણ તમસા નિત્યં વેષ્ટિતા મમ માયયા ।
સંસારસાગરે ઘોરે જાયન્તે ચ પુનઃ પુનઃ ॥ ૧૨।૨૯૪॥

ભક્ત્યા ત્વનન્યયા રાજન્ સમ્યગ્ જ્ઞાનેન ચૈવ હિ ।
અન્વેષ્ટવ્યં હિ તદ્ બ્રહ્મ જન્મબન્ધનિવૃત્તયે ॥ ૧૨।૨૯૫॥

અહંકારં ચ માત્સર્યં કામં ક્રોધપરિગ્રહમ્ ।
અધર્માભિનિવેશં ચ ત્યક્ત્વા વૈરાગ્યમાસ્થિતઃ ॥ ૧૨।૨૯૬॥

સર્વભૂતેષુ ચાત્માનં સર્વભૂતાનિ ચાત્મનિ ।
અન્વીક્ષ્ય ચાત્મનાત્માનં બ્રહ્મભૂયાય કલ્પતે ॥ ૧૨।૨૯૭॥

બ્રહ્મભૂતઃ પ્રસન્નાત્મા સર્વભૂતાભયપ્રદઃ ।
ઐશ્વરીં પરમાં ભક્તિં વિન્દેતાનન્યગામિનીમ્ ॥ ૧૨।૨૯૮॥

વીક્ષતે તત્પરં તત્ત્વમૈશ્વરં બ્રહ્મનિષ્કલમ્ ।
સર્વસંસારનિર્મુક્તો બ્રહ્મણ્યેવાવતિષ્ઠતે ॥ ૧૨।૨૯૯॥

બ્રહ્મણો હિ પ્રતિષ્ઠાઽયં પરસ્ય પરમઃ શિવઃ ।
અનન્યશ્ચાવ્યયસ્યૈકશ્ચાત્માધારો મહેશ્વરઃ ॥ ૧૨।૩૦૦॥

જ્ઞાનેન કર્મયોગેન ભક્તિયોગેન વા નૃપ ।
સર્વસંસારમુક્ત્યર્થમીશ્વરં શરણં વ્રજ ॥ ૧૨।૩૦૧॥

એષ ગુહ્યોપદેશસ્તે મયા દત્તો ગિરીશ્વર ।
અન્વીક્ષ્ય ચૈતદખિલં યથેષ્ટં કર્ત્તુમર્હસિ ॥ ૧૨।૩૦૨॥

અહં વૈ યાચિતા દેવૈઃ સંજાતા પરમેશ્વરાત્ ।
વિનિન્દ્ય દક્ષં પિતરં મહેશ્વરવિનિન્દકમ્ ॥ ૧૨।૩૦૩॥

ધર્મસંસ્થાપનાર્થાય તવારાધનકારણાત્ ।
મેનાદેહસમુત્પન્ના ત્વામેવ પિતરં શ્રિતા ॥ ૧૨।૩૦૪॥

સ ત્વં નિયોગાદ્દેવસ્ય બ્રહ્મણઃ પરમાત્મનઃ ।
પ્રિદાસ્યસે માં રુદ્રાય સ્વયંવરસમાગમે ॥ ૧૨।૩૦૫॥

તત્સંબન્ધાચ્ચ તે રાજન્ સર્વે દેવાઃ સવાસવાઃ ।
ત્વાં નમસ્યન્તિ વૈ તાત પ્રસીદતિ ચ શંકરઃ ॥ ૧૨।૩૦૬॥

તસ્માત્સર્વપ્રયત્નેન માં વિદ્ધીશ્વરગોચરામ્ ।
સમ્પૂજ્ય દેવમીશાનં શરણ્યં શરણં વ્રજ ॥ ૧૨।૩૦૭॥

સ એવમુક્તો ભગવાન્ દેવદેવ્યા ગિરીશ્વરઃ ।
પ્રણમ્ય શિરસા દેવીં પ્રાઞ્જલિઃ પુનરબ્રવીત્ ॥ ૧૨।૩૦૮॥

વિસ્તરેણ મહેશાનિ યોગં માહેશ્વરં પરમ્ ।
જ્ઞાનં વૈ ચાત્મનો યોગં સાધનાનિ પ્રચક્ષ્વ મે ॥ ૧૨।૩૦૯॥

તસ્યૈતત્ પરમં જ્ઞાનમાત્મયોગમુત્તમમ્ ।
યથાવદ્ વ્યાજહારેશાસાધનાનિચ વિસ્તરાત્ ॥ ૧૨।૩૧૦॥

નિશમ્ય વદનામ્ભોજાદ્ ગિરીન્દ્રો લોકપૂજિતઃ ।
લોકમાતુઃ પરં જ્ઞાનં યોગાસક્તોઽભવત્પુનઃ ॥ ૧૨।૩૧૧॥

પ્રદદૌ ચ મહેશાય પાર્વતીં ભાગ્યગૌરવાત્ ।

નિયોગાદ્બ્રહ્મણઃ સાધ્વીં દેવાનાં ચૈવ સંનિધૌ ॥ ૧૨।૩૧૨॥

ય ઇમં પઠતેऽધ્યાયં દેવ્યા માહાત્મ્યકીર્તનમ્ ।
શિવસ્ય સંનિધૌ ભક્ત્યા સુચિસ્તદ્ભાવભાવિતઃ ॥ ૧૨।૩૧૩॥

સર્વપાપવિનિર્મુક્તો દિવ્યયોગસમન્વિતઃ ।
ઉલ્લઙ્ઘ્ય બ્રહ્મણો લોકં દેવ્યાઃ સ્થાનમવાપ્નુયાત્ ॥ ૧૨।૩૧૪॥

યશ્ચૈતત્ પઠતિ સ્તોત્રં બ્રાહ્મણાનાં સમીપતઃ ।
સમાહિતમનાઃ સોऽપિ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧૨।૩૧૫॥

નામ્નામષ્ટસહસ્રં તુ દેવ્યા યત્ સમુદીરિતમ્ ।
જ્ઞાત્વાऽર્કમણ્ડલગતાં સંભાવ્ય પરમેશ્વરીમ્ ॥ ૧૨।૩૧૬॥

અભ્યર્ચ્ય ગન્ધપુષ્પાદ્યૈર્ભક્તિયોગસમન્વિતઃ ।
સંસ્મરન્પરમં ભાવં દેવ્યા માહેશ્વરં પરમ્ ॥ ૧૨।૩૧૭॥

અનન્યમાનસો નિત્યં જપેદામરણાદ્ દ્વિજઃ ।
સોऽન્તકાલે સ્મૃતિં લબ્ધ્વા પરં બ્રહ્માધિગચ્છતિ ॥ ૧૨।૩૧૮॥

અથવા જાયતે વિપ્રો બ્રાહ્મણાનાં કુલે શુચૌ ।
પૂર્વસંસ્કારમાહાત્મ્યાદ્ બ્રહ્મવિદ્યામવાપ્નુયાત્ ॥ ૧૨।૩૧૯॥

સમ્પ્રાપ્ય યોગં પરમં દિવ્યં તત્ પારમેશ્વરમ્ ।
શાન્તઃ સર્વગાતો ભૂત્વા શિવસાયુજ્યમાપ્નુયાત્ ॥ ૧૨।૩૨૦॥

પ્રત્યેકં ચાથ નામાનિ જુહુયાત્ સવનત્રયમ્ ।
પૂતનાદિકૃતૈર્દોષૈર્ગ્રહદોષૈશ્ચ મુચ્યતે ॥ ૧૨।૩૨૧॥

જપેદ્ વાऽહરહર્નિત્યં સંવત્સરમતન્દ્રિતઃ ।
શ્રીકામઃ પાર્વતીં દેવીં પૂજયિત્વા વિધાનતઃ ॥ ૧૨।૩૨૨॥

સમ્પૂજ્ય પાર્શ્વતઃ શંભું ત્રિનેત્રં ભક્તિસંયુતઃ ।
લભતે મહતીં લક્ષ્મીં મહાદેવપ્રસાદતઃ ॥ ૧૨।૩૨૩॥

તસ્માત્ સર્વપ્રયત્નેન જપ્તવ્યં હિ દ્વિજાતિભિઃ ।
સર્વપાપાપનોદાર્થં દેવ્યા નામ સહસ્રકમ્ ॥ ૧૨।૩૨૪॥

પ્રસઙ્ગાત્ કથિતં વિપ્રા દેવ્યા માહાત્મ્યમુત્તમમ્ ।
અતઃ પરં પ્રજાસર્ગં ભૃગ્વાદીનાં નિબોધત ॥ ૧૨।૩૨૫॥

ઇતિ શ્રીકૂર્મપુરાણે ષટ્સાહસ્ર્યાં સંહિતાયાં પૂર્વવિભાગે
દ્વાદશોઽધ્યાયઃ ॥ ૧૨ ॥

From sa.wikisource.org.

The text is different than found in Sansknet encoding.

Proofread byDPD

---

*Shri Devi or Paravti SahasranAmastotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*